सम्भाषणसन्देशः

जुलै - १९९६

विशेषलेखनानि -

गन्तव्यः मार्गः

संस्कृतसम्भाषण-माध्यमेन राष्ट्रोन्नयनकांक्षिभिः संस्कृतज्ञैः अस्माभिः केन मार्गेण गन्तव्यम्, केन प्रकारेण चिन्तनीयम् इत्यस्य सुस्पष्टं विश्लेषणं कृतम् अस्ति अत्र लेखकेन संस्कृतभारत्याः अखिल-भारतमन्त्रिणा चमू कृष्णशास्त्रिणा ।

भारते बहुभ्यः दशकेभ्यः 'संस्कृतं व्यवहारभाषा भवेत्', 'शिक्षायां संस्कृतस्य अनिवार्यस्थानं भवेत्', 'संस्कृतं भारतस्य सम्पर्कभाषा भवेत्' - इत्यादयः अभियाचनाः (इ्ठणञत्ठथ) आसन् अस्माकं संस्कृतज्ञानाम्। अपि च केन्द्रशासनं राज्यशासनानि च एताः अपेक्षाः साकारीकुर्युः इति प्रतीक्षामपि कृतवन्तः ते । परन्तु तथा नाभवत् । अतः वयम् अत्यन्तं सहजतया संस्कृतस्य अपेक्षित-विकासस्य अभावे शासनं दूषयामः, राजनैतिकनेतॄन् दूषयामः, समाजं च दूषयामः । यद्यपि ते अपि तत्र कारणीभूताः सन्ति, तथापि आत्मनिरीक्षणात्मकं चिन्तनं क्रियते चेत् ततोऽपि प्रमुखानि अन्यानि कतिचन कारणानि दृष्टिगोचराणि भवन्ति ।

* * *

अत्यन्तं वैज्ञानिकरूपेण रचितानां बहुविधानां छात्रोपयोगिनां पुस्तकानाम्, ध्वनिमुद्रिकाणाम्, वीडियो - इत्यादीनां महता प्रमाणेन प्रकाशनं करणीयम् । वर्तमानसंस्कृत-शिक्षकाणां सम्भाषणशिक्षणस्य प्रशिक्षणं कृत्वा तथा च प्रविष्टसम्भाषणशिबिराणां विशेषतया भाषा-शिक्षणं शिक्षकप्रशिक्षणं च दत्त्वा महत्या संख्यया सम्भाषण-शिक्षकाणां निर्माणं करणीयम्, तेषां शिक्षकाणां द्वारा स्थाने स्थाने निरन्तरं संस्कृतसम्भाषण-शिबिराणां, साप्ताहिकमेलनानां, भाषाबोधन-वर्गाणां च आयोजनं कर्तव्यम् । पत्राचारमाध्यमेन संस्कृतशिक्षायाः व्यवस्था प्रति राज्यम् आरब्धव्या (सद्यः एव संस्कृतभारत्या आरप्स्यते) । विविधसंस्थानां माध्यमेन आयोज्यमानानां सरलसंस्कृत-परीक्षाणां छात्रसंख्या वर्धनीया ।

* * *

अद्य समस्ते भारते संस्कृतच्छात्रसमूहः संस्कृत-शिक्षकाणश्च घोरनिराशायाम् अस्ति । तत्र उत्साहनिर्माणं करणीयम् । संस्कृतपाठशालाः पुनः चैतन्यशालिन्यः भवेयुः । संस्कृतेन समकालिक-साहित्यनिर्माणं भवेत् । अद्यतनजगतः सर्वान् विषयान् संस्कृतेन अभिव्यञ्जयितुम् अपारप्रमाणेन नूतनशब्द-निर्माणं कर्तव्यम् । विज्ञानस्य विविधशाखानां संस्कृतेन अनुवादं कृत्वा नवं विज्ञानसाहित्यं रचनीयम् । जीवनस्य विविधक्षेत्रं प्रति संस्कृतं नेतव्यम् । प्राचीनताडग्रन्थानां सङ्ग्रहः, प्रकाशनं च कर्तव्यम् । प्राचीनकाले शास्त्रज्ञानवर्धनं 'Scissoring & Pasting' इति कथ्यमानेन गवेषणेन नाभवत्, अपि तु गुरुमुखात् अध्ययनेन, वाक्यार्थ-सभादि-विद्वद्गोष्ठीभिः च अभवत् । अतः गुरुमुखात् शास्त्रपाठनं शास्त्रार्थसभाः च व्यवस्थापनीयाः ।

* * *

संस्कृतज्ञानां कृते विज्ञानादि-आधुनिक-विषयाणां परिचयः कारणीयः, वैज्ञानिकानां च कृते संस्कृतशिक्षणं कारणीयम् । एतत् शिक्षाविभागद्वारा न भवेत् । तत्र तत्र केचन उत्साहिनः स्वप्रेरणया स्वप्रयत्नेन च एतादृश-संयोगः यथा भवेत् तथा कारयेयुः । छात्राः एकां विद्यां नियतच्छात्ररूपेण अपरां च बाह्यच्छात्ररूपेण प्राप्नुयुः । क्षीयमाणशास्त्राणाम् अध्ययनाय एकैकः युवा प्रेरणीयः योजनीयश्च । शास्त्रसंरक्षणाय, संशोधनाय संवर्धनाय च विविधाः उपक्रमाः आपत्काल-त्वरितगत्या, युद्धसज्जतारीत्या च करणीयाः ।

भारतीयपरम्परायां त्यागः दानं च

भारतीयपरम्परायां त्यागः दानं च त्यागवीराणां दानवीराणां च परम्परा अस्माकम् । अस्मत्पूर्वजानां तादृशाः लोकोत्तराः सद्गुणाः किम् अस्माभिः न अनुसरणीयाः ?

भारतीयपरम्परायां त्यागस्य दानस्य च महत्त्वं किम् अस्ति इति सोदाहरणं प्रतिपादितवती अस्ति अत्र लेखिका डा॰ चि.न. मङ्गला ।

न कर्मणा न प्रजया धनेन
त्यागेनैके अमृतत्वमानशुः ।।

('अस्माभिः क्रियमाणानि कर्माणि, अस्मत्तः जातानि अपत्यानि, अस्माभिः सम्पादितं धनं वा अस्माकम् अमृतत्वं सम्पादयितुं न प्रभवन्ति । त्यागः एकः एव

अमृतत्वस्य कारणम् ।')

भारतीयसंस्कृत्यां त्यागस्य कीदृशं महत्त्वपूर्णं स्थानम् अस्ति इत्यंशं स्फुटं विवृणोति एतत् वाक्यम् । प्राप्त-देवेन्द्रपदवीकः जनः अपि अत्र सन्तृप्त्या न जीवितवान् । परन्तु यैः इन्द्रियाणि जितानि, यैः वैराग्यमार्गः आश्रितः ते केवलम् अत्र सन्तृप्तं जीवनम् अकुर्वन् ।

संस्कृतच्छात्रसमीक्षा

'संस्कृतच्छात्राः स्वशिक्षकेभ्यः कां निरीक्षां कुर्वन्ति - इति विषयः संस्कृतशिक्षकैः ज्ञातव्यः, एतद्विषये संस्कृतच्छात्राणाम् अभिप्रायाः सङ्ग्रहणीयाः' इति उद्देशेन 'सन्देश'-पक्षतः संस्कृतच्छात्रसमीक्षा कृता । एतस्यां समीक्षायां गृहीतभागानां छात्राणाम् अभिप्रायाणां सङ्ग्रहः !

व्यावहारिकभाषणशिक्षणम्

कस्याः अपि भाषायाः समीचीनं ज्ञानं प्राप्तुं तया भाषया सम्भाषणम् अत्यन्तम् आवश्यकम् । अतः अस्माकं शिक्षकाः छात्रान् अस्मान् शिशून् मत्वा प्रथमं सम्भाषणं पाठयेयुः । यदि सम्भाषणसमये अस्माभिः दोषाः क्रियन्ते तर्हि तेषां परिष्कारं कृत्वा शुद्धानि रूपाणि ते पाठयेयुः । स्वाभिप्रायं प्रकटयितुं ते अस्मभ्यं अवसरं कल्पयेयुः ।

कथा

आधुनिकजीवनसम्बद्धा विशिष्टा मनोहारिणी कथा

'मनोरमाशाटिका'

मम नाम मञ्जुमुखी इति । मातापित्रोः अहम् अद्वितीयम् अपत्यम् । सद्गतिप्राप्त्यर्थं पुत्रः आवश्यकः एव इति लोके चिन्तयन्ति जनाः । किन्तु मम मातापितरौ तादृशौ न । तौ माम् एव पुत्रं भावयन्तौ महत्या प्रीत्या मां पालितवन्तौ, पोषितवन्तौ च ।

..... !

विनोदः

'विद्युतः अभावः तदा तदा सर्वैः अपि अनुभूयते एव । एषा विद्युत् किमर्थं स्थिरा नास्ति ..... ? तस्या चपलतायां किं कारणम् ? जनानां शापः एव तत्र कारणम् इति वदति डा॰ रामकृष्णभट्टः ।

चञ्चलादेवी

मित्राणि, 'चञ्चला'शब्दस्य अर्थः कः इति किं जानन्ति भवन्तः ? विद्युतः अपरं नाम 'चञ्चला' इति । शम्पा, शतह्रदा, ह्लादिनी, ऐरावती, क्षणप्रभा, तडित्, सौदामिनी, चपला इत्यादीनि तस्याः नामान्तराणि । आकाशे दृश्यमानायाः तडितः एव रूपान्तरं विद्युत्, या च मानवैः तन्त्रशक्त्या उत्पाद्यते । एतस्याः चञ्चला इति किमर्थं नाम, किमर्थं वा तस्याः चञ्चलता आगता - इत्यादिकं ज्ञातुं कुतूहलं स्यात् खलु भवताम् ? विस्तरेण वदामि, शृण्वन्तु भवन्तः ।

बालमोदिनी

बोधप्रदं बालकथाद्वयम् -

विचित्रः उपदेशः

पूर्वं कश्चन राजकुमारः आसीत् । सः बहु उद्धतः आसीत् । तस्य मुखात् सदा अपि कटुवचनानि एव आगच्छन्ति स्म । तस्य राज्यस्य जनाः राजकुमारस्य एतादृशेन व्यवहारेण बहुधा खिन्नाः आसन् ।

वज्रादपि कठोराणि

एकदा महात्मा गान्धी पुणेनगरं गतवान् आसीत् । पुणेनगरे एकः पार्वतीदेवालयः अस्ति । महात्मा गान्धी तं देवालयं द्रष्टुम् इष्टवान् । अतः सः तत्र गतवान् । गमनसमये सः आचार्यं कृपलानिं भनसालिमहोदयं च स्वेन सह नीतवान् आसीत् ।

न केवलम् एतावत् । एतदतिरिच्य भवतां पदसम्पदः वर्धनाय 'निकषोपलः' पदरञ्जिनी च । विचारप्रदं सम्पादकीयम्, रसवार्ताः, संस्कृतवार्ताः, विनोदचित्राणि इत्यादयः बहवः अंशाः ।

अद्य एव पठ्यतां सम्भाषणसन्देशः, अत्यधिकप्रसारयुता संस्कृतमासपत्रिका ।